# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## परिभाषाप्रकरणम् (१)

०४.०८.२०१०

# ३४. इको गुणवृद्धी (१.१.३)

- पदद्वयम् । इकः, गुणवृद्धी । ‘वृद्धिरादैच्’ इत्यतः ‘वृद्धिः’ इति, ‘अदेङ् गुणः’ इत्यतः ‘गुणः’ इति अनुवर्तते ।
- गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र ‘इकः’ इति षष्ठ्यन्तं पदमुपतिष्ठते ।

- मिदेर्गुणः – ’मिद्’ धातोः इकः गुणः स्यात् ।
- मिद् य ति
- मेद् य ति = मेद्यति ।
-
- मृजेर्वृद्धिः – ’मृज्’ धातोः इकः वृद्धिः स्यात् ।
- मृज् ति
- मार्ज् ति = मार्ष्टि ।

- त्यदादीनामः – त्यदादीनाम् अकारः आदेशः स्यात् ।
- इदम् स्
- इद अ स् (अलोऽन्त्यस्य)
- 
- दिव औत् – दिवः औकारः आदेशः स्यात् ।
- दिव् स्
- दि औ स् (अलोऽन्त्यस्य)

# ३५. अचश्च (१.२.२८)

- पदद्वयम् । अचः, च । 'ऊकालोऽच्' इति सूत्रेण अच्, ह्रस्वदीर्घप्लुतः इति अनुवर्तते ।
  ह्रस्व-दीर्घ-प्लुतशब्दाभ्यां यत्र अज् विधीयते, तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते ।
-

- शमामष्टानां दीर्घः श्यनि – शमादीनां धातूनां अचः श्यनि परे दीर्घः स्यात् ।
- शम् य ति
- शाम् य ति = शाम्यति ।
- 
- अष्टन आ विभक्तौ – अष्टन् शब्दस्य आकारः आदेशः स्यात् ।
- अष्टन् औ
- अष्ट आ औ (अलोऽन्त्यस्य)